# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – आचार्यः | प्रश्नपत्रम् – ४ | गुणाः – ५० |
| विषयः – नव्यव्याकरणम् | सत्रम् – ४ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १६/०७/२०२१ | सन्दर्भग्रन्थः – वाक्यपदीयम् (ब्रह्मकाण्डम्) | |

सूचना - निम्नलिखितेषु एकादशसु प्रश्नेषु केषाञ्चित् पञ्च प्रश्नाः विधेयाः।
प्रत्येकं प्रश्नस्य समानगुणाः। (१०)

प्रश्नः १ निम्नलिखितयोः द्वयोः कारिकयोः व्याख्या कार्या। १०

१ स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु।
प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते।।

२ भेदानुकारः ज्ञानस्य वाचस्योपप्लवो ध्रुवः।
क्रमोपसृष्टावाग् ज्ञानं ह्येयव्यपाक्रमता।।

३ अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोटः इति स्मृता।
कैश्चिद् व्यक्तयः एवास्या ध्वनित्वेन प्रकल्पिता।।

४ अन्तःकरणतत्त्वस्य वायुराग्रयतां मतः।
तद्धर्मेण समाविष्टस्तेजसैव विवर्तते।।

प्रश्नः २ कथं ध्वनयः स्कोटाभिव्यञ्जकाः इति विवेच्य शब्दाभिव्यक्तिविषये त्रीन् वादान् प्रदर्शयत। १०

प्रश्नः ३ वर्णेषु वर्णावयवाः, पदे वर्णाः वाक्ये पदानि च कथम् अवभासन्ते इति वाक्यपदीयानुसारं उपपादयत। १०

प्रश्नः ४ शब्दगतजर्तिर्वाचकत्वमभ्युपगच्छतां जातिस्फोटवादिनां मतं ग्रन्थोक्तदिशा प्रतिपादयत। १०

प्रश्नः ५ नादस्फोटयोः स्वरूपं वर्णयत। १०

प्रश्नः ६ निम्नलिखितयोः द्वयोः कारिकयोः व्याख्या कार्या। १०

१ तस्य प्राणे च या शक्तिर्या च बुद्धौ व्यवस्थिता।
विवर्तमाना स्थानेषु सैषा भेदे प्रपद्यते।।

२ न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

३ वेदशास्त्राविरोधो य तर्कश्चक्षुरपश्यताम्।
रूपमात्राद्धि वाक्यार्थः केवलान्नावतिष्ठते।।

४ शब्दः संस्कारहीनो यो गौरिति प्रयुयुक्षिते।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम्।।

**प्रश्नः ७ शब्दादेव जगदुत्पत्तिः इति सिद्धान्तं विशदयत।**

**प्रश्नः ८ शब्दब्रह्मणि तादात्म्यभावोपायाः के ? ग्रन्थोक्तदिशा वर्णयत।**

**प्रश्नः ९ वाक्यपदीयकारमते व्याकरणस्य स्मृतित्वं प्रतिपादयत।**

**प्रश्नः१० सर्वो हि विकार वाच एवेति मतं समर्थयत।**

**प्रश्नः११ निम्नलिखितेषु केषाञ्चित् दशानां प्रश्नानां लघूत्तरं प्रदेयम्।**

१ कतिविधो ध्वनिः ?

२ नादो नाम किम् ?

३ कः स्फोटः ?

४ ग्रहणग्राह्ययोः को भेदः ?

५ कति वृत्तयः ?

६ शब्दविषये विदुषां किं मतम् ?

७ के षट्जादयः ?

८ संसारोऽयं कस्य परिणामः ?

९ असाधुशब्देषु धर्मजनकत्वमस्ति न वा ?

१० व्याकरणस्मृतिः कीदृशी वर्त्तते?

११ श्रुतेः कानि विशेषणानि ?

१२ कः पुनः अपभ्रंशः ?

१३ केन विना स्फोटः न भासते ?

१४ शब्दाभिव्यक्तिविषये कति वादाः सन्ति ?

१५ आनुपूर्वीनियमेन कः स्फोटस्य क्रमः ?

***